# Mudgalakritam Ganesha Kavacham

# મુદ્ગલકૃતં ગણેશકવચમ્

## Document Information

Text title : Mudgalakritam Ganesha Kavacham

File name : gaNeshakavachaMmudgalakRRitam.itx

Category : ganesha, gaNeshapurANa, kavacha

Location : doc_ganesha

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM krIDA (uttara)khaNDaH | adhyAyaH 85 | 2.85 18-42||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# મુદ્ગલકૃતં ગણેશકવચમ્

મુનિરુવાચ ।
ધ્યાયેત્ સિંહગતં વિનાયકમમું દિગ્બાહુમાદ્યે યુગે
ત્રેતાયાન્તુ મયૂરવાહનમિમં ષડ્બાહુકં સિદ્ધિદમ્ ।
દ્વાપારે તુ ગજાનનં યુગભુજં રક્તાઙ્ગરાગં વિભું
તુર્યે તુ દ્વિભુજં સિતાઙ્ગરુચિરં સર્વાર્થદં સર્વદા ॥ ૧૮॥

વિનાયકઃ શિખાં પાતુ પરમાત્મા પરાત્પરઃ ।
અતિસુન્દરકાયસ્તુ મસ્તકં સુમહોત્કટઃ ॥ ૧૯॥

લલાટં કાશ્યપઃ પાતુ ભ્રૂયુગન્તુ મહોદરઃ ।
નયને ભાલચન્દ્રસ્તુ ગજાસ્યત્વોષ્ઠપલ્લવૌ ॥ ૨૦॥

જિહ્વાં પાતુ ગણક્રીડશ્ચિબુકં ગિરિજાસુતઃ ।
વાચં વિનાયકઃ પાતુ દન્તાન્ રક્ષતુ દુર્મુખઃ ॥ ૨૧॥

શ્રવણૌ પાશપાણિસ્તુ નાસિકાં ચિન્તિતાર્થદઃ ।
ગણેશસ્તુ મુખં કણ્ઠં પાતુ દેવો ગણઞ્જયઃ ॥ ૨૨॥

સ્કન્ધૌ પાતુ ગજસ્કન્ધઃ સ્તનૌ વિઘ્નવિનાશનઃ ।
હૃદયં ગણનાથસ્તુ હેરમ્બો જઠરં મહાન્ ॥ ૨૩॥

ધરાધરઃ પાતુ પાર્શ્વૌ પૃષ્ઠં વિઘ્નહરઃ શુભઃ ।
લિઙ્ગં ગુહ્યં સદા પાતુ વક્રતુણ્ડો મહાબલઃ ॥ ૨૪॥

ગણક્રીડો જાનુજઙ્ઘે ઊરુમઙ્ગલમૂર્તિમાન્ ।
એકદન્તો મહાબુદ્ધિઃ પાદૌ ગુલ્ફૌ સદાઽવતુ ॥ ૨૫॥

ક્ષિપ્રપ્રસાદનો બાહૂ પાણી આશાપ્રપૂરકઃ ।
અઙ્ગુલીશ્ચ નખાન્ પાતુ પદ્મહસ્તોઽરિનાશનઃ ॥ ૨૬॥

સર્વાઙ્ગાનિ મયૂરેશો વિશ્વવ્યાપી સદાઽવતુ ।

અનુક્તમપિ યત્ સ્થાનં ધૂમ્રકેતુઃ સદાઽવતુ ॥ ૨૭॥

આમોદસ્ત્વગ્રતઃ પાતુ પ્રમોદઃ પૃષ્ઠતોઽવતુ ।
પ્રાચ્યાં રક્ષતુ બુદ્ધીશ આગ્નેય્યાં સિદ્ધિદાયકઃ ॥ ૨૮॥

દક્ષિણસ્યામુમાપુત્રો નૈરૃત્યાં તુ ગણેશ્વરઃ ।
પ્રતીચ્યાં વિઘ્નહર્તાઽવ્યાદ્ વાયવ્યાં ગજકર્ણકઃ ॥ ૨૯॥

કૌબેર્યાં નિધિપઃ પાયાદીશાન્યામીશનન્દનઃ ।
દિવાઽવ્યાદેકદન્તસ્તુ રાત્રૌ સન્ધ્યાસુ વિઘ્નહૃત્ ॥ ૩૦॥

રાક્ષસાસુરવેતાલગ્રહભૂતપિશાચતઃ ।
પાશાઙ્કુશધરઃ પાતુ રજઃ સત્ત્વં તમઃ સ્મૃતિમ્ ॥ ૩૧॥

જ્ઞાનં ધર્મઞ્ચ લક્ષ્મીઞ્ચ લજ્જાં કીર્તિં દયાં કુલમ્ ।
વપુર્ધનં ચધાન્યં ચગૃહાન્ દારાન્ સુતાન્ સખીન્ ॥ ૩૨॥

સર્વાયુધધરઃ પૌત્રાન્ મયૂરેશોઽવતાત્ સદા ।
કપિલોઽજાવિકં પાતુ ગવાશ્વં વિકટોઽવતુ ॥ ૩૩॥

ભૂર્જપત્રે લિખિત્વેદં યઃ કણ્ઠે ધારયેત્ સુધીઃ ।
ન ભયં જાયતે તસ્ય યક્ષરક્ષઃ પિશાચતઃ ॥ ૩૪॥

ત્રિસન્ધ્યં જપતે યસ્તુ વજ્રસારતનુર્ભવેત્ ।
યાત્રાકાલે પઠેદ્ યસ્તુ નિર્વિઘ્નેન ફલં લભેત્ ॥ ૩૫॥

યુદ્ધકાલે પઠેદ્યસ્તુ વિજયં પ્રાપ્નુયાદ્ ધ્રુવમ્ ।
મારણોચ્ચાટનાકર્ષસ્તમ્ભમોહનકર્મણિ ॥ ૩૬॥

સપ્તવારં પઠેદ્ યસ્તુ દિનાનામેકવિંશતિમ્ ।
તત્ તત્ ફલમવાપ્નોતિ સાધકો નાત્ર સંશયઃ ॥ ૩૭॥

એકવિંશતિવારઞ્ચ પઠેત્ તાવદ્ દિનાનિ યઃ ।
કારાગૃહગતં સદ્યો રાજ્ઞા વધ્યં ચમોચયેત્ ॥ ૩૮॥

રાજદર્શનવેલાયાં પઠેદેતત્ ત્રિવારતઃ ।
સ રાજાનં વશં નીત્વા પ્રકૃતિં ચસભાં જયેત્ ॥ ૩૯॥

ઇદં ગણેશકવચં મુદ્ગલેન સમીરિતમ્ ।
કશ્યપાય ચ તેનાઽથ માણ્ડવ્યાય મહર્ષયે ॥ ૪૦॥

મહ્યં સ પ્રાહ કૃપયા કવચં સર્વસિદ્ધિદમ્ ।
ન દેયં ભક્તિહીનાય દેયં શ્રદ્ધાવતે શુભમ્ ॥

સર્વરક્ષાકરં સર્વમનઃકામપ્રપૂરકમ્ ॥ ૪૧॥

અનેનાસ્ય કૃતા રક્ષા ન બાધાઽસ્ય ભવેત્ ક્વચિત્ ।
રાક્ષસાસુરવેતાલદૈત્યદાનવસમ્ભવા ॥ ૪૨॥

ઇતિ શ્રીગણેશપુરાણાન્તર્ગતં મુદ્ગલકૃતં ગણેશકવચં સમ્પૂર્ણમ્ ।

- ॥ શ્રીગણેશપુરાણં ક્રીડા (ઉત્તર)ખણ્ડઃ । અધ્યાયઃ ૮૫ । ૨.૮૫ ૧૮-૪૨॥

- .. shrIgaNeshapurANaM krIDA (uttara)khaNDaH . adhyAyaH 85 . 2.85 18-42..

Proofread by Preeti Bhandare

---

*Mudgalakritam Ganesha Kavacham*

pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*